श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीभीष्मस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीभीष्मस्तुतिः ॥

श्रीभीष्म उवाच
इति मतिरुपकल्पिता वितृष्णा
    भगवति सात्वतपुङ्गवे विभूम्नि।
स्वसुखमुपगते क्वचिद्विहर्तुं
    प्रकृतिमुपेयुषि यद्भवप्रवाहः॥ १ ॥

त्रिभुवनकमनं तमालवर्णं
    रविकरगौरवराम्बरं दधाने।
वपुरलककुलावृताननाब्जं
    विजयसखे रतिरस्तु मेऽनवद्या॥ २ ॥

युधि तुरगरजोविधूम्रविष्वक्-
    कचलुलितश्रमवार्यलङ्कृतास्ये।
मम निशितशरैर्विभिद्यमान-
    त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा॥ ३ ॥

सपदि सखिवचो निशम्य मध्ये
    निजपरयोर्बलयो रथं निवेश्य।
स्थितवति परसैनिकायुरक्ष्णा
    हृतवति पार्थसखे रतिर्ममास्तु॥ ४ ॥

व्यवहितपृतनामुखं निरीक्ष्य
    स्वजनवधाद्विमुखस्य दोषबुद्ध्या।
कुमतिमहरदात्मविद्यया यः
    चरणरतिः परमस्य तस्य मेऽस्तु॥ ५ ॥

स्वनिगममपहाय मत्प्रतिज्ञा-
    मृतमधिकर्तुमवप्लुतो रथस्थः।

धृतरथचरणोऽभ्ययाच्चलद्गु-
    र्हरिरिव हन्तुमिभं गतोत्तरीयः॥ ६॥

शितविशिखहतो विशीर्णदंशः
    क्षतजपरिप्लुत आततायिनो मे।
प्रसभमभिससार मद्वधार्थं
    स भवतु मे भगवान् गतिर्मुकुन्दः॥ ७॥

विजयरथकुटुम्ब आत्ततोत्रे
    धृतहयरश्मिनि तच्छ्रियेक्षणीये।
भगवति रतिरस्तु मे मुमूर्षो-
    र्यमिह निरीक्ष्य हता गताः स्वरूपम्॥ ८॥

ललितगतिविलासवल्गुहास-
    प्रणयनिरीक्षणकल्पितोरुमानाः।
कृतमनुकृतवत्य उन्मदान्धाः
    प्रकृतिमगन् किल यस्य गोपवध्वः॥ ९॥

मुनिगणनृपवर्य सङ्कुलेऽन्त-
    स्सदसि युधिष्ठिर राजसूय एषाम्।
अर्हणमुपपेद ईक्षणीयो
    मम दृशिगोचर एष आविरात्मा॥ १०॥

तमिममहमजं शरीरभाजां
    हृदि हृदि धिष्ठितमात्मकल्पितानाम्।
प्रतिदृशमिव नैकधार्कमेकं
    समधिगतोऽस्मि विधूतभेदमोहः॥ ११॥

सूत उवाच
कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः।
आत्मन्यात्मानमावेश्य सोऽन्तः श्वास उपारमत्॥ १२॥

॥ इति श्रीभीष्मस्तुतिः समाप्ता॥



www.prapatti.com